दैवी संपद्विमोक्शाय निबन्धायासुरी मता ।

मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव ॥ १६.५ ॥

daivī sampadvimokśāya nibandhāyāsurī matā |
mā śucaḥ sampadaṁ daivīmabhijāto'si pāṇḍava || 16.5||

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ।

दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ १६.६ ॥

dvau bhūtasargau loke'smindaiva āsura eva ca |
daivo vistaraśaḥ prokta āsuraṁ pārtha me śṛṇu || 16.6||

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।

न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ १६.७ ॥

pravṛttiṁ ca nivṛttiṁ ca janā na vidurāsurāḥ |
na śaucaṁ nāpi cācāro na satyaṁ teṣu vidyate || 16.7||

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।

अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥ १६.८ ॥

asatyamapratiṣṭhaṁ te jagadāhuranīśvaram |
aparasparasambhūtaṁ kimanyatkāmahaitukam || 16.8||